# श्रीमद्बृहद्भागवतामृतम्

Śrīmad-Bṛhad-Bhāgavatāmṛtam
The Larger Nectar of the Bhāgavata
Version 0.3

श्रीसनातनगोस्वामिप्रणीतम्

by Sanātana Gosvāmin

April 18, 2004

# Contents


**I भगवत्कृपासारनिर्धारः** 2

**1 भौमो नाम** 3

**2 दिव्यो नाम** 12

**3 प्रपञ्चातीतो नाम** 23

**4 भक्तो नाम** 32

# Part I

# भगवत्कृपासारनिर्धारः

# Chapter 1

# भौमो नाम

जयति निजपदाब्जप्रेमदानावतीर्णो
विविधमधुरिमाब्धिः कोऽपि कैशोरगन्धिः ।
गतपरमदशान्तं यस्य चैतन्यरूपाद्
अनुभवपदमाप्तं प्रेम गोपीषु नित्यम् ॥१ ॥

श्रीराधिकाप्रभृतयो नितरां जयन्ति
गोप्यो नितान्तभगवत्प्रियताप्रसिद्धाः ।
यासां हरौ परमसौहृदमाधुरीणां
निर्वक्तुमीषदपि जातु न कोऽपि शक्तः ॥२ ॥

स्वदयितनिजभावं यो विभाव्य स्वभावात्
सुमधुरमवतीर्णो भक्तरूपेण लोभात् ।
जयति कनकधामा कृष्णचैतन्यनामा
हरिरिह यतिवेषः श्रीशचीसुनुरेषः ॥३ ॥

जयति मथुरादेवी श्रेष्ठा पुरीषु मनोरमा
परमदयिता कंसारातेर् जनिस्थितिरञ्जिता ।

दुरितहरणान्मुक्तेर्भक्तेरपि प्रतिपादनाज्
जगति महिता तत्तत्क्रीडाकथास्तु विदूरतः ॥ ४ ॥

जयति जयति वृन्दारण्यमेतन्मुरारेः
प्रियतममतिसाधुस्वान्तवैकुण्ठवासात् ।
रमयति स सदा गाः पालयन् यत्र गोपीः
स्वरितमधुरवेणुर्वर्धयन् प्रेम रासे ॥ ५ ॥

जयति तरणिपुत्री धर्मराजस्वसा या
कलयति मथुरायाः सख्यमत्येति गङ्गाम् ।
मुरहरदयिता तत्पादपद्मप्रसूतं
वहति च मकरन्दं नीरपूरच्छलेन ॥ ६ ॥

गोवर्धनो जयति शैलकुलाधिराजो
यो गोपिकाभिरुदितो हरिदासवर्यः ।
कृष्णेन शक्रमखभङ्गकृतार्चितो यः
सप्ताहमस्य करपद्मतलेऽप्यवात्सीत् ॥ ७ ॥

जयति जयति कृष्णप्रेमभक्तिर्यदङ्घ्रिं
निखिलनिगमतत्त्वं गूढमाज्ञाय मुक्तिः ।
भजति शरणकामा वैष्णवैस्त्यज्यमाना
जपयजनतपस्यान्यासनिष्ठां विहाय ॥ ८ ॥

जयति जयति नामानन्दरूपं मुरारेर्
विरमितनिजधर्मध्यानपूजादियत्नम् ।
कथमपि सकृदात्तं मुक्तिदं प्राणिनां यत्
परमममृतमेकं जीवनं भूषणं मे ॥ ९ ॥

नमः श्रीकृष्णचन्द्राय निरुपाधिकृपाकृते ।
यः श्रीचैतन्यरूपोऽभूत् तन्वन् प्रेमरसं कलौ ॥१० ॥

भगवद्भक्तिशास्त्राणामयं सारस्य सङ्ग्रहः
अनुभूतस्य चैतन्यदेवे तत्प्रियरूपतः ॥११ ॥

शृण्वन्तु वैष्णवाः शास्त्रमिदं भागवतामृतम् ।
सुगोप्यं प्राह यत् प्रेम्णा जैमिनिर्जनमेजयम् ॥१२ ॥

मुनीन्द्राज्जैमिनेः श्रुत्वा भारताख्यान्मद्भुतम् ।
परीक्षिन्नन्दनोऽपृच्छत्तत्खिलं श्रवणोत्सुकः ॥१३ ॥

श्रीजनमेजय उवाच

न वैशम्पायनात् प्राप्तो ब्रह्मन् यो भारते रसः ।
त्वत्तो लब्धः स तच्छेषं मधुरेण समापय ॥१४ ॥

श्रीजैमिनिरुवाच

शुकदेवोपदेशेन निहताशेषसाध्वसं ।
सम्यक्प्राप्तसमस्तार्थं श्रीकृष्णप्रेमसम्प्लुतम् ॥
सन्निकृष्टनिजाभीष्टपदारोहणकालकं ।
श्रीमत्परीक्षितं माता तस्यार्ता कृष्णतत्परा ॥
विराटतनयैकान्तेऽपृच्छदेतन्नृपोत्तमं ।
प्रबोध्यानिन्दिता तेन पुत्रेण स्नेहसंप्लुता ॥१५ ॥

श्रीमदुत्तरोवाच

यत् शुकेनोपदिष्टं ते वत्स निष्कृष्य तस्य मे ।
सारं प्रकाशय क्षिप्रं क्षीराम्भोधेरिवामृतम् ॥१६ ॥

श्रीजैमिनिरुवाच

उवाच सादरं राजा परीक्षित्तन्मातृवत्सलः ।
श्रुतात्यद्भुतगोविन्दकथाख्यानरसोत्सुकः ॥ १७ ॥

श्रीविष्णुरात उवाच

मातर्यद्यपि कालेऽस्मिंश्चिकीर्षितमुनिव्रतः ।
तथाप्यहं तव प्रश्नमाधुरीमुखरीकृतः ॥
गुरोः प्रसादतस्तस्य श्रीमतो वादरायणेह् ।
प्रणम्य ते सपुत्रायाः प्राणदं प्रभुमच्युतम् ॥
तत्कारुण्यप्रभावेण श्रीमद्भागवतामृतं ।
समुद्धृतं प्रयत्नेन श्रीमद्भागवतोत्तमैः ॥
मुनीन्द्रमण्डलीमध्ये निश्चितं महतां मतं ।
महागुह्यमयं सम्यक् कथयाम्यवधारय ॥ १८ ॥

एकदा तीर्थमूर्धन्ये प्रयागे मुनिपुङ्गवाः ।
माघे प्रातः कृतस्नानाः श्रीमाधवसमीपतः ॥
उपविष्टा मुदाविष्टा मन्यमानाः कृतार्थतां ।
कृष्णस्य दयितोऽसीति श्लाघन्ते स्म परस्परम् ॥ १९ ॥

मतस्तदानीं तत्रैव विप्रवर्यः समागतः ।
दशाश्वमेधिके तीर्थे भगवद्भक्तितत्परः ॥
सेवितोऽशेषसम्पद्भिस्तद्देशस्याधिकारवान् ।
वृतः परिजनैर्विप्रभोजनार्थं कृतोद्यमः ॥
विचित्रोत्कृष्टवस्तूनि स निष्पाद्य महामनाः ।
आवश्यकं समाप्यादौ संस्कृत्य महतीम् स्थलीम् ॥
सत्वरं चत्वरं तत्र मध्ये निर्माय सुन्दरं ।

उपलिप्य स्वहस्तेन वितानान्युदतानयत् ॥ २० ॥

शालग्रामशिलारूपं कृष्णं स्वर्णासने शुभे ।
निवेश्य भक्त्या संपूज्य यथाविधि मुदा भृतः ॥
भोगाम्बरादिसामग्रीमर्पयित्वाग्रतो हरेः ।
स्वयं नृत्यन् गीतवाद्यादिभिश्चक्रे महोत्सवम् ॥ २१ ॥

ततो वेदपुराणादिव्याख्याभिर्वादकोविदान् ।
विप्रान् प्रणम्य यतिनो गृहिणो ब्रह्मचारिणः ॥
वैष्.नवांश्च सदा कृष्णकीर्तनानन्दलम्पटान् ।
सुबहून्मधुरैर्वाक्यैर्व्यवहारैश्च हर्षयन् ॥
पादशौचजलं तेषां धारयन् शिरसि स्वयं ।
भगवत्यर्पितैस्तद्वदन्नादिभिरपूजयत् ॥ २२ ॥

भोजयित्वा ततो दीनानन्त्यजानपि सादरं ।
अतोषयद्यथान्यायं श्वशृगालान् खगक्रिमीन् ॥ २३ ॥

एवं सन्तर्पिताशेषः समादिष्टोऽथ साधुभिः ।
परिबारैः समं शेषं सहर्षं बुभुजेऽमृतम् ॥ २४ ॥

ततोऽभिमुखमागत्य कृष्णस्य रचिताञ्जलिः ।
तस्मिन्नेवार्पयामास सर्वं तत्फलसञ्चयम् ॥ २५ ॥

सुखं संवेश्य देवं तं स्वगृहं गन्तुमुद्यतम् ।
दूराच्छ्रीनारदो दृष्ट्वोत्थितो मुनिसमाजतः ॥
अयमेव महाविष्णोः प्रेयानिति मुहुर्ब्रुवन् ।
धावन् गत्वान्तिके तस्य विप्रेन्द्रस्येदमब्रवीत् ॥ २६ ॥
श्रीकृष्णपरमोत्कृष्टकृपाया भाजनं जनं ।
लोके विख्यापयन् व्यक्तं भगवद्भक्तिलम्पटः ॥ २७ ॥

श्रीनारद उवाच

भवान् विप्रेन्द्र कृष्णस्य महानुग्रहभाजनं ।
यस्येदृशं धनं द्रव्यमौदार्यं वैभवं तथा ॥
सद्धर्मोपादकं तच्च सर्वमेव महामते ।
दृष्टं हि साक्षादस्माभिरस्मिंस्तीर्थवरेऽधुना ॥
विद्वद्वरेण तेनोक्तो नत्विदं स महामुनिः ।
स्वामिन् किं मयि कृष्णस्य कृपालक्षणमीक्षितम् ॥
अहं वराकः को नु स्यां दातुं शक्नोमि वा कियत् ।
वैभवं वर्तते किं मे भगवद्भजनं कुतः ॥ २८ ॥

किन्तु दक्षिणदेशे यो महाराजो विराजते ।
स हि कृष्णकृपापात्रं यस्य देशे सुरालयाः ॥ २९ ॥

सर्वतो भिक्षवो यत्र तैर्थिकाभ्यागतादयः ।
कृष्णार्पितान्नं भुञ्जाना भ्रमन्ति सुखिनः सदा ॥ ३० ॥

राजधानीसमीपे च सच्चिदानन्दविग्रहः ।
साक्षादिवास्ते भगवान् कारुण्यात् स्थिरतां गतः ॥ ३१ ॥

नित्यं नवनवस्तत्र जायते परमोत्सवः ।
पूजाद्रव्याणि चेष्टानि नूतनानि प्रतिक्षणम् ॥ ३२ ॥

विष्णोर्निवेदितैस्तैस्तु सर्वे तद्देशवासिनः ।
वैदेशिकाश्च बहवो भोज्यन्ते तेन सादरम् ॥ ३३ ॥

पुण्डरीक्षाक्षदेवस्य तस्य दर्शनलोभतः ।
महाप्रसादरूपान्नाद्युपभोगसुखान्वितः ॥
साधुसङ्गतिलाभाच्च नानादेशात् समागताः ।

निवसन्ति सदा तत्र सन्तो विष्णुपरायणाः ॥ ३४ ॥

देशश्च देवविप्रेभ्यो राज्ञा दत्तो विभज्य सः ।
नोपद्रवोऽस्ति तद्देशे कोऽपि शोकोऽथवा भयम्॥ ३५ ॥

अकृष्टपच्या सा भूमिर्वृष्टिस् तत्र यथासुखं ।
इष्टानि फलमूलानि सुलभान्यम्बराणि च
स्वस्वधर्मकृतः सर्वाः सुखिन्यः कृष्णतत्पराः ।
प्रजास्तमनुवर्तन्ते महाराजं यथा सुताः ॥ ३६ ॥

स चागर्वः सदा नीचयोग्यसेवाभिरच्युतं ।
भजमानोऽखिलान् लोकान्नमयत्यच्युतप्रियः ॥ ३७ ॥

तस्याग्रे विविधैर्नामगाथासंकीर्तनैः स्वयं ।
नृत्यन् दिव्यानि गीतानि गायन् वाद्यानि वादयन् ॥
भ्रातृभार्यासुतैः पौत्रैर्भृत्यामात्यपुरोहितैः ।
अन्यैश्च स्वजनैः साकं प्रभुं तं तोषयेत् सदा ॥ ३८ ॥

ते ते तस्य गुणव्राताः कृष्णभक्त्यनुवर्तिनः ।
संख्यातुं कति कथ्यन्ते ज्ञायन्ते कति वा मया ॥ ३९ ॥

श्रीपरीक्षिदुवाच

ततो नृपवरं द्रष्टुं तद्देशे नारदो व्रजन् ।
देवपूजोत्सवासक्तास्तत्र तत्रैक्षत प्रजाः ॥ ४० ॥

हर्षेण वादयन् वीणां राजधानीं गतोऽधिकं ।
विप्रोक्तादपि संपश्यन् संगम्योवाच तं नृपम् ॥ ४१ ॥

श्रीनारद उवाच

त्वं कृष्णकृपापात्रं यस्येदृग्राज्यवैभवं ।
सल्लोकगुणधर्मार्थज्ञानभक्तिभिरन्वितम् ॥ ४२ ॥

श्रीपरीक्षिदुवाच

तत्तत्विस्तार्य कथयन्नाश्लिष्यन् भूपतिं मुहुः ।
प्रशशंस गुणान् गायन् वीणया वैष्णवोत्तमः ॥ ४३ ॥

सार्वभौमो मुनिवरं संपूज्य प्रश्रितोऽब्रवीत् ।
निजश्लाघाभराज्जातलज्जानमितमस्तकः ॥ ४४ ॥

देवर्षेऽल्पायुषं स्वल्पैश्वर्यमल्पप्रदं नरं ।
अस्वतन्त्रं भयाक्रान्तं तापत्रयनियन्त्रितम् ॥
कृष्णानुग्रहवाक्यस्याप्ययोग्यमविचारतः ।
तदीयकरुणापात्रं कथं मां मन्यते भवान् ॥ ४५ ॥

देवा एव दयापात्रं विष्णोर्भगवतः किल ।
पूज्यमाना नरैर्नित्यं तेजोमयशरीरिणः ॥
निष्पापाः सात्त्विका दुःखरहिताः सुखिनः सदा ।
स्वच्छन्दाचारगतयो भक्तेच्छावरदायकाः ॥
येषां हि भोग्यममृतं मृत्युरोगजरादिहृत् ।
स्वेच्छयोपनतं क्षुत्तृड्बाधाभावेऽपि तुष्टिदम् ॥
वसन्ति भगवन् स्वर्गे महाभाग्यबलेन ये ।
यो नृभिर्भारते वर्षे सत्पुण्यैर्लभ्यते कृतैः ॥ ४६ ॥

मुने विशिष्टस्तत्रापि तेषामिन्द्रः पुरन्दरः ।
निग्रहेऽनुग्रहेऽपीशो वृष्टिभिर्लोकजीवनः ॥
त्रिलोकीश्वरता यस्य युगानामेकसप्ततिं ।

याश्वमेधशतेनापि सार्वभौमस्य दुर्लभा ॥
हय उच्चैःश्रवा यस्य गज ऐरावतो महान् ।
कामधुग्गौरुपवनं नन्दनं च विराजते ॥ ४७ ॥

पारिजातादयो यत्र वर्तन्ते कामपूरकाः ।
कामरूपधराः कल्पद्रुमाः कल्पलतान्विताः ॥ ४८ ॥
येषामेकेन पुष्पेण यथाकामं सुसिध्यति ।
विचित्रगीतवादित्रनृत्यवेशाशनादिकम् ॥ ४९ ॥

आः किं वाच्यं परं तस्य सौभाग्यं भगवान् गतः ।
कनिष्ठभ्रातृतां यस्य विष्णुर्वामनरूपधृक् ॥ ५० ॥
आपद्भ्यो यमसौ रक्षन्हर्षयन्येन विस्तृतां ।
साक्षात् स्वीकुरुते पूजां तद्वेत्सि त्वमुतापरम् ॥ ५१ ॥

इति भागवतामृते भगवत्कृपासारनिर्धारखण्डे भौमो नाम प्रथमोऽध्यायः ।

# Chapter 2

# दिव्यो नाम

श्रीपरीक्षिदुवाच

प्रशस्य तं महाराजं स्वर्गतो मुनिरैक्षत ।
राजमानं सभामध्ये विष्णुं देवगणैर्वृतम् ॥१ ॥

विचित्रकल्पतरुद्रुमपुष्पमाला-
विलेपभूषावसनामृताद्यैः ।
समर्चितं दिव्यतरोपचारैः
सुखोपविष्टं गरुडस्य पृष्टे ॥

बृहस्पतिप्रभृतिभिः स्तूयमानं महर्षिभिः ।
लाल्यमानमदित्या तान् हर्षयन्तं प्रियोक्तिभिः ॥

सिद्धविद्याध्रगन्धर्वाप्सरोभिर्विविधैस्तवैः ।
जयशब्दाइर्वाद्यगीतनृत्यैश्च परितोषितम् ॥

शक्रायाभयमुच्चोक्त्या दैत्येभ्यो ददतं दृढं ।
कीर्त्यार्प्यमाणं ताम्बुलं चर्वन्तं लीलयाहृतम् ॥

शक्रञ्च तस्य माहात्म्यं कीर्तयन्तं मुहुर्मुहुः ।
स्वमिन् कृतोपकारांश्च वर्णयन्तं महामुदा ॥

सहस्रनयनैरश्रुधारावर्षन्तमासने ।
स्वीये निषण्णं तत्पार्श्वे राजन्तं स्वविभूतिभिः॥ २॥

अथ विष्णुं निजावासे गच्छन्तमनुगम्य तम् ।
सभायामागतं शक्रमाशस्योवाच नारदः ॥

श्रीनारद उवाच

कृतानुकल्पितस्त्वं यत् सूर्यचन्द्रयमादयः ।
तवाज्ञाकारिणः सर्वे लोकपालाः परे किम् ॥

मुनयोऽस्मादृशो वश्याः श्रुतयस्त्वां स्तुवन्ति हि ।
जगदीशतया यत्त्वं धर्माधर्मफलप्रदः॥ ३॥

अहो नारायणो भ्राता कनीयान् यस्य सोदरः ।
सद्धर्मं मानयन् यस्य विदधात्यादरं सदा॥ ४॥

श्रीपरीक्षिदुवाच

इत्थमिन्द्रस्य सौभाग्यवैभवं कीर्तयन्मुहुः ।
देवर्षिर्वादयन् वीणां श्लाघमानो ननर्त तम्॥ ५॥

ततोऽभिवाद्य देवर्षिमुवाचेन्द्रः शनैर्ह्रिया ।
भो गान्धर्वकलाभिज्ञ किं मामुपहसन्नसि॥ ६॥

अस्य न स्वर्गराजस्य वृत्तं वेत्सि त्वमेव किम् ।
कति वारानितो दैत्यभीत्यास्माभिर्न निर्गतम्॥ ७॥

आचरन् बलिरिन्द्रत्वमसुरानेव सर्वतः ।
सूर्येन्द्वाद्यधिकारेषु न्ययुङ्क्त क्रतुभागभुक्॥ ८ ॥

ततो नस्तातमातृभ्यां तपोभिर्विततैर्दृढैः ।
तोषितोऽप्यंशमात्रेण गतो भ्रातृत्वमच्युतः॥ ९ ॥

तथाप्यहत्वा ताञ्छत्रून् केवलं नस्त्रपाकृता ।
मायायाचनयादाय बले राज्यं ददौ स मे॥ १०॥

स्पर्धासूयादिदोषेण ब्रह्महत्यादिपापतः ।
नित्यपातभयेनापि किं सुखं स्वर्गवासिनाम्॥ ११॥

किञ्च मां प्रत्युपेन्द्रस्य विद्ध्युपेक्षां विशेषतः ।
सुधर्मां पारिजातञ्च स्वर्गान्मर्त्यं निनाय सः॥ १२॥

गोपालैः क्रियमाणां मे न्यहन् पूजां चिरन्तनीम् ।
अखण्डं खाण्डवाख्यं मेप्रियं दाहितवान्वनम्॥ १३॥

त्रैलोक्यत्रासकृद्वृत्रवधार्थं प्रार्थितः पुरा ।
औदासीन्यं भजंस्तत्र प्रेरयामास मां परम्॥ १४॥

उत्साद्य मामवज्ञाय मदीयाममरावतीम् ।
सर्वोपरि स्वभवनं रचयामास नूतनम्॥ १५॥

आराधनबलात् पित्रोराग्रहाच्च पुरोधसाः ।
पूजां स्वीकृत्य नः सद्यो यात्यदृश्यं निजं पदं॥ १६॥

पुनः सत्वरमागत्य स्वार्घ्यस्वीकरणाद्वयम् ।
अनुग्राह्यास्त्वयेत्युक्तोऽस्मानादिशति वञ्चयन्॥
यावन्नाहं समायामि तावद्ब्रह्मा शिवोऽथवा ।

भवद्भिः पूजनीयोऽत्र मत्तो भिन्नौ न तौ यतः॥
एकमूर्तिस्त्रयोदेवा विष्णुरुद्रपितामहाः ।
इत्यादिशास्त्रवचनं भवद्भिर्विस्मृतं किमु॥ १७॥

वासोऽस्यानियतोऽस्माभिरगम्यो मनुदुर्लभः ।
वैकुण्ठे ध्रुवलोके च क्षीराब्धौ च कदाचन॥
सम्प्रति द्वारकायाञ्च तत्रापि नियमोऽस्ति न ।
कदाचित् पाण्डवागारे मथुरायां कदाचन॥
पूर्यां कदाचित्तत्रापि गोकुले च वनाद्वने ।
इत्थं तस्यावलोकोऽपि दुर्लभो नः कुतः कृपा॥
परमेष्ठिसुतश्रेष्ठ किन्तु स्वपितरं हरेः ।
अनुग्रहपदं विद्धि लक्ष्मीकान्तसुतो हि सः॥ १८॥

यस्यैकस्मिन्दिने शक्रा मादृशाः स्युश्चतुर्दश ।
मन्वादियुक्ता यस्याहश्चतुर्युगसहस्रकम्॥
निशा च तावतीत्थं याहोरात्राणां शतत्रयी ।
षष्ठ्युत्तराभवेद्वर्षं यस्यायुस्तच्छतं स्मृतम्॥ १९॥

लोकानां लोकपालानामपि स्रष्टाधिकारदः ।
पालकः कर्मफलदो रात्रौ संहारकश्च सः॥
सहस्रशीर्षा यल्लोके स महापुरुषः स्फुटम् ।
भुञ्जानो यज्ञभागौघं वसत्यानन्ददः सदा॥ २०॥

इत्थं युक्तिसहस्रैः स श्रीकृष्णस्य कृपास्पदम्।
किं वक्तव्यं कृपापात्रमिति कृष्णः स एव हि॥
तच्छ्रुतिस्मृतिवाक्येभ्यः प्रसिद्धं ज्ञायते त्वया।
अन्यच्च तस्य माहात्म्यं तल्लोकानामपि प्रभो॥ २१॥

श्रीपरीक्षिदुवाच

इन्द्रस्य वचनं श्रुत्वा साधु भो साध्विति ब्रुवन् ।
त्वरावान् ब्रह्मणो लोकं भगवान्नारदो गतः ॥
यज्ञानां महतां तत्र ब्रह्मर्षिभिरनारतम् ।
भक्त्या वितायमानानां प्रघोषं दूरतोऽशृणोत् ॥ २२ ॥

ददर्श च ततस्तेषु प्रसन्नः परमेश्वरः ।
महापुरुषरूपेण जटामण्डलमण्डितः ॥
सहस्रमूधा भगवान्यज्ञमूर्तिः श्रिया सह ।
आविर्भूयाददद्भागानानन्दयति याजकान् ॥ २३ ॥

पद्मयोनेः प्रहर्षार्थं द्रव्यजातं निवेदितम् ।
सहस्रपाणिभिर्वक्त्रसहस्रेष्वर्पयन्नदन् ॥
दत्त्वेष्टान्यजमानेभ्यो वरान्निद्रागृहं गतः ।
लक्ष्मीसंवाह्यमानाङ्घ्रिर्निद्रामादत्त लीलया ॥ २४ ॥

तदाज्ञया च यज्ञेषु नियुज्यर्षीन्निजात्मजान् ।
ब्रह्माण्डकार्यचर्यार्थं स्वं धिष्ण्यं विधिरागतः ॥ २५ ॥

पारमेष्ठ्यासने तत्र सुखासीनं निजप्रभोः ।
महिमाश्रवणाख्यानपरं सास्राष्टनेत्रकम् ॥
विचित्रपरमैश्वर्यसामग्रीपरिसेवितम् ।
स्वतातं नारदोऽभ्येत्य प्रणम्योवाच दण्डवत् ॥ २६ ॥

श्रीनारद उवाच

भवानेव कृपापात्रं ध्रुवं भगवतो हरेः ।
प्रजापतिपतिर्यो वै सर्वलोकपितामहः ॥

एकः सृजति पात्यत्ति भुवनानि चतुर्दश ।
ब्रह्माण्डस्येश्वरो नित्यं स्वयम्भुर्यश्च कथ्यते॥ २७॥

सभायां यस्य विद्यते मूर्तिमन्तोऽर्थबोधकाः ।
यच्चतुर्वक्त्रतो जाताः पुराणनिगमादयः॥ २८॥

यस्य लोकश्च निश्छिद्रस्वधर्माचारनिष्ठया ।
मदादिरहितैः सद्भिर्लभ्यते शतजन्मभिः॥ २९॥

यस्योपरि न वर्तते ब्रह्माण्डे भवनं परम् ।
लोको नारायणस्यापि वैकुण्ठाख्यो यदन्तरे॥ ३०॥

यस्मिन्नित्यं वसेत् साक्षान्महापुरुषविग्रहः ।
स पद्मनाभो यज्ञानां भागानश्नन् ददत् फलम्॥ ३१॥

परमान्वेषणायासैर्यस्योद्देशोऽपि न त्वया ।
पुरा प्राप्तः परं दृष्टस्तपोभिर्हृदि यः क्षणम्॥ ३२॥

तत्सत्यमसि कृष्णस्य त्वमेव नितरां प्रियः ।
अहो नूनं स एव त्वं लीलानानावपुर्धरः॥ ३३॥

श्रीपरीक्षिदुवाच

इत्थं माहात्म्यमुद्गायन् विस्तार्य ब्रह्मणोऽसकृत् ।
शक्रप्रोक्तं स्वदृष्टं च भक्त्यासीत्तं नमन्मनिः॥ ३४॥

शृण्वन्नेव स तद्वाक्यं दासोऽस्मीति मुहुर्वदन् ।
चतुर्वक्त्रोऽष्टकर्णानां पिधाने व्यग्रतां गतः॥
अश्रव्यश्रवणाज्जातं कोपं यत्नेन धारयन् ।
स्वपुत्रं नारदं प्राह साक्षेपं चतुराननः॥ ३५॥

श्रीब्रह्मोवाच

अहं न भगवान् कृष्ण इति त्वं किं प्रमाणतः ।
युक्तितश्च मयाभीक्ष्णं बोधितोऽसि न बाल्यतः॥ ३६॥

तस्य शक्तिर्महामाया दासीवेक्षा पथे स्थिता ।
सृजतीदं जगत् पाति स्वगुणैः संहरत्यपि॥ ३७॥

तस्या एव वयं सर्वेऽप्यधीना मोहितास्तया ।
तन्न कृष्णकृपालेशस्यापि पात्रमवेहि माम्॥ ३८॥

तन्माययैव सततं जगतोऽहं गुरुः प्रभुः ।
पितामहश्च कृष्णस्य नाभिपद्मसमुद्भवः॥
तपस्व्याराधकस्तस्येत्याद्यैर्गुरुमदैर्हतः ।
ब्रह्माण्डावश्यकापारव्यापारामर्शविह्वलः॥
भूतप्रायात्मलोकीयनाशचिन्तानियन्त्रितः ।
सर्वग्रासिमहाकालाद्भीतो मुक्तिं परं वृणे॥ ३९॥

तदर्थं भगवत्पूजां कारयामि करोमि च ।
आवासो जगदीशस्य तस्य वा न क्व विद्यते॥ ४०॥

वेदप्रवर्तनायासौ भागं गृह्णाति केवलम् ।
स्वयं सम्पादितप्रेष्ठयज्ञस्यानुग्रहाय च॥ ४१॥

विचाराचार्य बुध्यस्व स हि भक्त्येकवल्लभः ।
कृपां तनोति भक्तेषु नाभक्तेषु कदाचन॥ ४२॥

भक्तिर्दूरेऽस्तु तस्मिन्मे नापराधा भवन्ति चेत् ।
बहु मन्ये तदात्मानं नाहमागःसु रुद्रवत्॥ ४३॥

मदात्तवरजातोऽसौ सर्वलोकोपतापकः ।
हिरण्यकशिपुर्दुष्टो वैष्णवद्रोहतत्परः॥
श्रीमन्नृसिंहरूपेण प्रभुना संहृतो यदा ।
तदाहं सपरीवारो विचित्रस्तवपाटवैः॥
स्तुवन् स्थित्वा भयाद्दूरेऽपाङ्गदृष्ट्यापि नादृतः ।
प्रह्लादस्याभिषेके तु वृत्ते तस्मिन्प्रसादतः॥
शनैरुपसृतोऽभ्यर्णमादिष्टोऽहमिदं रुषा ।
मैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव॥
तथापि रावणादिभ्यो दुष्टेभ्योऽहं वरानदाम् ।
रावणस्य तु यत् कर्म जिह्वा कस्य गृणोति तत्॥ ४४॥

मया दत्ताधिकाराणां शक्रादीनां महामदैः ।
सदा हतविवेकानां तस्मिन्नागांसि संस्मर॥
वृष्टियुद्धादिनेन्द्रस्य गोवर्धनमखादिषु ।
नन्दाहरणवाणीयधेन्वदानादिनाप्पतेः॥
यमस्य च तदाचार्यात्मजदुर्मारणादिना ।
कुवेरस्यापि दुश्चेष्टशङ्खचूडकृतादिना॥
अधो लोके तु दैतेया वैष्णवद्रोहकारिणः ।
सर्पाश्च सहजक्रोधदुष्टा कलियबान्धवाः॥ ४५॥

सम्प्रत्यपि मया तस्य स्वयं वत्सास्तथार्भकाः ।
वृन्दावने पाल्यमाना भोजने मायया हृताः॥ ४६॥

ततो वीक्ष्य महाश्चर्यं भीतः स्तुत्वा नमन्नपि ।
धृष्टोऽहं वञ्चितस्तेन गोपबालकलीलया॥ ४७॥

तस्य स्वाभाविकास्यब्जप्रसादेक्षणमात्रतः ।

हृष्टः स्वं मन्ये स्म तत्प्रियव्रजभूगतेः॥ ४८।

तत्रात्मनश्चिरस्थित्यापराधाः स्युरिति त्रसन् ।
अपासरं किमन्यैस्तन्निजासौभाग्यवर्णनैः॥ ४९॥

अथ ब्रह्माण्डमध्येऽस्मिन् तादृङ्नेक्षे कृपास्पदं ।
विष्णोः किन्तु महादेव एव ख्यातः सखेति यः॥ ५०॥

यश्च श्रीकृष्णपादाब्जरसेणोन्मादितः सदा ।
अवधीरितसर्वार्थपरमैश्वर्यभोगकः॥
अस्मादृशो विषयिनो भोगासक्तान् हसन्निव ।
धुस्तूरार्कास्थिमालाधृग्नग्नो भस्मानुलेपनः॥
विप्रकीर्णजटाभार उन्मत्त इवे घूर्णते ।
तथा स्वगोपनासक्तः कृष्णपादाब्जशौचजाम् ।
गङ्गां मूर्ध्नि वहन् हर्षान्नृत्यंश्च लयते जगत्॥ ५१॥

कृष्णप्रसादात्तेनैव मादृशामधिकारिणाम् ।
अभीष्टार्पयितुं मुक्तिस्तस्य पत्न्यापि शक्यते॥ ५२॥

अहो सर्वेऽपि ते मुक्ताः शिवलोकनिवासिनः ।
मुक्तास्तत्कृपया कृष्णभक्ताश्च कति नाभवन्॥ ५३॥

कृष्णाच्छिवस्य भेदेक्षो महादोषकरी मता ।
आगो भगवता स्वस्मिन् क्षम्यते न शिवे कृतम्॥ ५४॥

शिवदत्तवरोन्मत्तात्त्रिपुरेश्वरतो भयात् ।
तथा वृकासुरादेश्च सङ्कटं परमं गतः ।
शिवः समुद्धृतोऽनेन हर्षितश्च वचोऽमृतैः॥
तदन्तरङ्गसद्भक्त्या कृष्णेन वशवर्तिना ।

स्वयमाराध्यते चास्य माहात्म्यभरसिद्धये॥ ५५॥

तिष्ठतापि स्वयं साक्सात् कृष्णेनामृतमन्थने ।
प्रजापतिभिराराध्य स गौरीप्राणवल्लभः ।
समानाय्य विषं घोरं पाययित्वा विभूषितः ।
महामहिमधाराभिरभिषिक्तश्च तत् स्फुटम्॥ ५६॥

पुराणान्येव गायन्ति दयालुत्वं हरेर्हरे ।
ज्ञायते हि त्वयाप्येतत्परञ्च स्मर्यतां मुने॥५७॥

श्रीपरीक्षिदुवाच

गुरुं प्रणम्य तं गन्तुं कैलासं गिरिमुत्सुकः ।
आलक्ष्योक्तः पुनस्तेन स्वपुत्रः पुत्रवत्सले॥ ५८॥

श्रीब्रह्मोवाच

कुवेरेण पुराराध्य भक्त्या रुद्रो वशीकृतः ।
ब्रह्माण्डाभ्यन्तरे तस्य कैलासेऽधिकृते गिरौ।
तद्दिदिक्पालरूपेण तद्योग्यपरिवारकः ।
वसत्याविष्कृतस्वल्पवैभवः सन्नुमापतिः॥ ५९॥

यथा हि कृष्णो भगवान् मादृशां भक्तियन्त्रितः ।
मम लोके स्वरादौ च वसत्युचितलीलया॥ ६०॥

अथ वायुपुराणस्य मतमेतद्ब्रवीम्यहम् ।
श्रीमहादेवलोकस्तु सप्तावरणतो बहिः।
नित्यः सुखमयः सत्यो लभ्यस्तत्सेवकोत्तमैः॥ ६१॥

समानमहिमश्रीमत्परिवारगणावृतः ।
महाविभूतिमान् भाति सत्परिच्छदमण्डितः॥

श्रीमत्सङ्कर्षणं स्वस्मादभिन्नं तत्र सोऽर्चयन् ।
निजेष्टदेवतात्वेन किम्वा नातनुतेऽद्भुतम्॥ ६२॥

तत्र गन्तुं भवाञ्छक्तः श्रीशिवे शुद्धभक्तिमान् ।
अभिगम्य तमाश्रित्य कृपां कृष्णस्य पश्यतु॥ ६३॥

श्रीपरीक्षिदुवाच

इत्येवं शिक्षितो मातः शिवकृष्णेति कीर्तयन् ।
नारदः शिवलोकं तं प्रयातः कौतुकादिव॥ ६४॥

इति भागवतामृते भगवत्कृपासारनिर्धारखण्डे दिव्यो नाम द्वितीयोऽध्यायः ।

# Chapter 3

# प्रपञ्चातीतो नाम

श्रीपरीक्षिदुवाच

भगवन्तं हरं तत्र भावाविष्टतया हरेः ।
नृत्यन्तं कीर्तयन्तञ्च कृतसङ्कर्षणार्चनम्॥
भृशं नन्दीश्वरादींश्च श्लाघमानं निजानुगान् ।
प्रीत्या सजयशब्दानि गीतवाद्यानि तन्वतः॥
देवीं चोमां प्रशंसन्तं करतालीषु कोविदाम् ।
दूराद्दृष्ट्वा मुनिर्हृष्टोऽनमद्वीणां निनादयन्॥ १॥

परमानुगृहीतोऽसि कृष्णस्येति मुहुर्मुहः ।
जगौ सर्वं च पित्रोक्तं सुस्वरं समकीर्तयत्॥ २॥

अथ श्रीरुद्रपादाब्जरेणुस्पर्शनकाम्यया ।
समीपेऽभ्यागतं देवो वैकुण्ठस्य प्रियं मुनिम्॥
आकृष्याश्लिष्य संमत्तः श्रीकृष्णरसधारया ।
भृशं पप्रच्छ किं ब्रूषे ब्रह्मपुत्रेति सादरं॥ ३॥

ततः श्रीवैष्णवश्रेष्ठसंभाषणरसाप्लुतम् ।

सन्त्यक्तनृत्यकुतुकं मितप्रियजनावृतम्॥
पार्वतीप्राणनाथं तं वृष्यां वीरासनेन सः ।
आसीनं प्रणमन् भक्त्या पठन् रुद्रषडङ्गकम्॥
जगदीशत्वमाहात्म्यप्रकाशनपरैः स्तवैः ।
अस्तौद्विवृत्य तस्मिंश्च जगौ कृष्णकृपाभरम्॥ ४॥

कर्णौ पिधाय रुद्रोऽसौ सक्रोधमवदत्भृशम्।
सर्ववैष्णवमूर्धन्यो विष्णुभक्तिप्रवतकः॥ ५॥

न जातु जगदीशोअःअं नापि कृष्णकृपास्पदम्।
परं तद्दासदासानां सदानुग्रहकामुकः॥ ६॥

श्रीपरीक्षिदुवाच

संभ्रान्तोऽथ मुनिर्हित्वा कृष्णेनैक्येन तत्स्तुतिम्।
सापराधमिवात्मानं मन्यमानोऽब्रवीच्छनैः॥ ७॥

श्रीनारद उवाच

सत्यमेव भवान् विष्णोर्वैष्णवानाञ्च दुर्गमाम्।
निगूढां महिमश्रेणीं वेत्ति विज्ञापयत्यपि॥ ८॥

अतो हि वैष्णवश्रेष्ठैरिष्यते त्वदनुग्रहः।
कृष्णश्च महिमानं ते प्रीतो वितनुतेऽधिकम्॥ ९॥

कति वारांश्च कृष्णेन वरा विविधमूर्तिभिः।
भक्त्या भवन्तमाराध्य गृहीताः कति सन्ति न॥ १०॥

श्रीपरीक्षिदुवाच

इति श्रुत्वा सहसा धैर्यं कर्तुमशक्नुवन्।

लज्जितो द्रुतमुत्थाय नारदस्य मुखं हरः।
कराभ्यां पिदधे धार्ष्ट्यं मम तन्न वदेरिति॥ ११॥

अनन्तरमुवाचोच्चैः सविस्मयमहो मुने।
दुर्वितर्क्यतरं लीलावैभवं दृश्यतां प्रभोः॥ १२॥

अहो विचित्रगम्भीरमहिमाब्धिर्मदीश्वरः।
विब्धेष्वपराधेषु नोपेक्षेत कृतेष्वपि॥ १३॥

श्रीपरीक्षिदुवाच

परमानन्दितो धृत्वा पादयोरुपवेश्य तम्।
नारदः परितुष्टाव कृष्णभक्तिसम्प्लुतम्॥ १४॥

श्रीनारद उवाच

नापराधावकाशस्ते प्रेयसः कश्चिदुच्यते।
कदाचिल्लोकदृष्ट्यापि जातो नास्मिन् प्रकाशते॥ १५॥

स्वबाहुबलदृप्तस्य साधूपद्रवकारिणः।
मायाबद्धानिरुद्धस्य युध्यमानस्य चक्रिणा॥
हतप्रायस्य बाणस्य निजभक्तस्य पुत्रवत्।
पालितस्य त्वया प्राणरक्षार्थं श्रीहरिः स्तुतः॥
सद्यो हित्वा रुषं प्रीतो दत्त्वा निजस्वरूपताम्।
भगवत्पार्षदतां निन्ये तम् दुरापं सुरैरपि॥ १६॥

भवांश्च वैष्णवद्रोहिगार्ग्याधिभ्यः सुदुश्चरैः।
तपोभिर्भजनमानिएभ्यो नाव्यलीकं वरं ददे॥ १७॥

चित्रकेतुप्रभृतयोऽधियोऽप्यंशाश्रिता हरेः।
निन्दका यद्यपि स्वस्य तेभ्योऽकुप्यस्तथापि न॥ १८॥

कृष्णस्य प्रीतये तस्माच्छ्रैष्ठ्यमप्यभिवाञ्छता।
तद्भक्तैव चातुर्यविशेषेणार्थिता त्वया॥ १९॥

अतो ब्रह्मादिसंप्रार्थ्यमुक्तिदानाधिकारिताम्।
भवते भगवत्यै च दुर्गायै भगवानदात्॥ २०॥

अहो ब्रह्मादिदुष्प्रापे ऐश्वर्ये सत्यपीदृशे।
तत् सर्वं सुखमप्यात्म्यमनादृत्यावधूतवत्॥
बावाविष्टः सदा विष्णोर्महोन्मादगृहीतवत्।
कोऽन्यः पत्न्या समं नृत्येद्गणैरपि दिगम्बरः॥
दृष्टोऽद्य भगवद्भक्तिलाम्पत्यमहिमाद्भुतः।
तद्भवानेव कृष्णस्य नित्यं परमवल्लभः॥
आः किम्वाच्याऽनवच्छिन्ना कृष्णस्य प्रियता त्वयि।
त्वत्प्रसादेन बहवोऽन्येऽपि तत्प्रियतां गताः॥ २१॥

पार्वत्याश्च प्रसादेन बहवस्तत्प्रियाः कृताः।
तत्त्वाभिज्ञा विशेषेण भवतोरियमेव हि॥ २२॥

कृष्णस्य भगिनीरैषा स्नेहपात्रं सदाम्बिका।
अतएव भवानात्मारामोऽप्येतामपेक्षते॥ २३॥

विचित्रभगवन्नामसङ्कीर्तनकथोत्सवैः।
सदेमां रमयन् विष्णुजनसङ्गसुखं भजेत्॥ २४॥

श्रीपरीक्षिदुवाच

ततो महेश्वरो मातस्त्रपावनमिताननः।
नारदं भगवद्भक्तमवदद्वैष्णवाग्रणीः॥ २५॥

श्रीमहेश उवाच

अहो बत महत्कष्टं त्यक्तसर्वाभिमान हे।
क्वाहं सर्वाभिमानानां मूलं क्व त्वादृशेश्वरः॥ २६॥

लोकेशो ज्ञानदो ज्ञानी मुक्तो मुक्तिप्रदोऽप्यहम्।
भक्तो भक्तिप्रदो विष्णोरित्याद्यहङ्क्रियावृतः॥
सर्वग्रासकरे घोरे महाकाले समागते।
विलज्जेऽशेषसंहारतामसं स्वप्रयोजनात्॥ २७॥

मयि नारद वर्तेत कृपालेशोऽपि चेद्धरेः।
तदा किं पारिजातोषाहरणादौ मया रणः॥
किं मामाराधयेद्दासं किमेतच्चादिशेत् प्रभुः।
स्वागमैः कल्पितैस्त्वञ्च जनान् मद्विमुखान् कुरु॥ २८॥

आवयोर्मुक्तिदातृत्वं यद्भवान् स्तौति हृष्टवत्।
तच्चातिदारुणं तस्य भक्तानां श्रुतिदुःखदम्॥ २९॥

तत् कृष्णपार्षदश्रेष्ठो मा मां तस्य दयास्पदं।
विद्धि किन्तु कृपासारभाजो वैकुण्ठवासिनः॥ ३०॥

यैः सर्वं तृणवत्त्यक्त्वा भक्त्याराध्य प्रियं हरिं।
सर्वार्थसिद्धयो लब्ध्वापाङ्गदृष्ट्यापि नादृताः॥ ३१॥

त्यक्तसर्वाभिमाना ये समस्तभयवर्जितम्।
वैकुण्ठं सच्चिदानन्दं गुणातीतं पदं गताः॥ ३२॥

तत्र ये सच्चिदानन्ददेहाः परमवैभवम्।
संप्राप्तं सच्चिदानन्दं हरिसार्ष्टिञ्च नाभजन्॥ ३३॥

हरेर्भक्त्या परं प्रीता भक्तान् भक्तिञ्च सर्वतः।
रक्षन्तो वर्धयन्तश्च सञ्चरन्ति यदृच्छया॥ ३४॥

मुक्तानुपहसन्तीव वैकुण्ठे सततं प्रभुं।
भजन्तः पक्षिवृक्षादिरूपैर्विविधसेवया॥
कमलालाल्यमानाङ्घ्रिकमलं मोदवर्धनम्।
सम्पश्यन्तो हरिं साक्षाद्रमन्ते सह तेन ये॥ ३५॥

अहो कारुण्यमहिमा श्रीकृष्णस्य कुतोऽन्यतः।
वैकुण्ठलोके योऽजस्रं तैश्येषु च राजते॥ ३६॥

यस्मिन्महामदाश्रान्तं प्रभोः सङ्कीर्तनादिभिः।
विचित्रामन्तरा भक्तिं नास्त्यन्यत्प्रेमवाहिनीम्॥ ३७॥

अहो तत्परमानन्दरसाब्धेर्महिमाद्भुतः।
ब्रह्मानन्दस्तुलां नार्हेत् यत्कणार्द्धांशकेन च॥ ३८॥

स वैकुण्ठस्तदीयाश्च तत्रत्यमखिलञ्च यत्।
तदेव कृष्नपादाब्जपरप्रेमानुकम्पितम्॥ ३९॥

तादृक्कारुण्यपात्राणां श्रीमद्वैकुण्ठवासिनाम्।
मत्तोऽधिकतरस्तत्तन्महिमा किं नु वर्ण्यताम्॥ ४०॥

पाञ्चभौतिकदेहा ये मर्त्यलोकनिवासिनः।
भगवद्भक्तिरसिका नमस्या मादृशां सदा॥ ४१॥

श्रीकृष्णचरणाम्भोजार्पितात्मानो हि ये किल।
तदेकप्रेमलाभाशात्यक्तार्थजनजीवनाः॥
ऐहिकामुष्मिकाशेषसाध्यसाधननिस्पृहाः।
जातिवर्णाश्रमाचारधर्माधीनत्वपारगाः॥
ऋणत्रयादनिर्मुक्ता वेदमार्गातिगा अपि।
हरिभक्तिबलावेगादकुतश्चिद्भयाः सदा॥

नान्यत्किमपि वाञ्छन्ति तद्भक्तिरसलम्पटाः।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥ ४२॥

भगवानिव सत्यं मे त एव परमप्रियाः।
परमप्रार्थनीयश्च मम तैः सह सङ्गमः॥ ४३॥

नारदाहमिदं मन्ये तादृशानां यतः स्थितिः।
भवेत् स एव वैकुण्ठलोको नात्र विचारणा॥ ४४॥

कृष्णभक्तिसुधापानाद्देहदैहिकविस्मृतेः।
तेषां भौतिकदेहेऽपि सच्चिदानन्दरूपता॥ ४५॥

परं भगवता साकं साक्षात्क्रीडापरम्पराः।
सदानुभवितुं तैर्हि वैकुण्ठोऽपेक्ष्यते क्वचित्॥ ४६॥

अतो हि सर्वे तत्रत्या मयोक्ताः सर्वतोऽधिकाः।
दयाविशेषविषयाः कृष्णस्य परमप्रियाः॥ ४७॥

श्रीपार्वत्युवाच

तत्रापि श्रीर्विशेषेण प्रसिद्धा श्रीहरिप्रिया।
तादृग्वैकुण्ठवैकुण्ठवासिनामीश्वरी हि या॥ ४८॥

यस्याः कटाक्षपातेन लोकपालविभूतयः।
ज्ञानं विरक्तिर्भक्तिश्च सिध्यन्ति यदनुग्रहात्॥ ४९॥

या विहायादरेणापि भजमानान् भवादृशान्।
वव्रे तपोभिराराध्य निरपेक्षञ्च तं प्रियम्॥ ५०॥

करोति वसतिं नित्यं या रम्ये तस्य वक्षसि।
पतिव्रतोत्तमाशेषावतारेष्वनुयात्यमुम्॥ ५१॥

श्रीपरीक्षिदुवाच

ततः परमहर्षेण क्षोभितात्मालपन्मुनिः।
जय श्रीकमलाकान्त हे वैकुण्ठपते हरे॥
जय वैकुण्ठलोकेति तत्रत्या जयतेति च।
जय कृष्णप्रिये पद्मे वैकुण्ठाधीश्वरीत्यपि॥ ५२॥

अथाभिनन्दनायास्या वैकुण्ठे गन्तुमुत्थितः।
अभिप्रेत्य हरेणोक्तः करे धृत्वा निवार्य सः॥ ५३॥

श्रीमहेश उवाच

कृष्णप्रियजनालोकोत्सुकताविहतस्मृते।
न किं स्मरसि यद्भूमौ द्वारकायां वसत्यसौ॥ ५४॥

रुक्मिणी सा महालक्ष्मी कृष्णस्तु भगवान् स्वयम्।
तस्या अंशावतारा हि वामनादिसमीपतः॥ ५५॥

सम्पूर्णा परिपूर्णस्य लक्ष्मीर्भगवतः सदा।
निषेवते पदाम्भोजे श्रीकृष्णस्यैव रुक्मिणी॥ ५६॥

तस्मादुपविश ब्रह्मन् रहस्यं परमं शनैः।
कर्णे ते कथयाम्येकं परमश्रद्धया शृणु॥ ५७॥

त्वत्तातत्तो मद्गरुडादितश्च
श्रियोऽपि कारुण्यविशेषपात्रम्।
प्रह्लाद एव प्रथितो जगत्यां
कृष्णस्य भक्तो नितरां प्रियश्च॥ ५८॥

भगवद्वचनानि त्वं किं नु विस्मृतवानसि।
अधीतानि पुराणेषु श्लोकमेतं न किं स्मरेः॥

नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना।
श्रियञ्चात्यन्तिकीञ्चापि येषां गतिरहं परा॥ ५९॥

मदादिदेवतायोनिर्निजभक्तविनोदकृत्।
श्रीमूर्तिरपि सा येभ्यो नापेक्ष्या को हि नौतु तान्॥ ६०॥

तत्राप्यशेषभक्तानामुपमानतयोदितः।
साक्षाद्भगवतैवासौ प्रह्लादोऽतर्क्यभाग्यवान्॥ ६१॥

तस्य सौभाग्यमस्माभिः सर्वैर्लक्ष्म्याप्यनुत्तमम्।
साक्षाद्धिरण्यकशिपोरनुभूतं विदारणे॥ ६२॥

पुनः पुनर्वारान् दित्सुर्विष्णुर्मुक्तिं न याचितः।
भक्तिरेव वृता येन प्रह्लादं तं नमाम्यहम्॥ ६३॥

मर्यादालङ्घकस्यापि गुर्वादेशाकृतो मुने।
असम्पन्नस्ववाग्जालसत्यतान्तस्य यद्बलेः॥ ६४॥

द्वारेतादृगवस्थानां तुच्छदानफलं किम्।
रक्षणं दुष्टबाणस्य किं नु मत्स्तवकारितम्॥ ६५॥

केवलं तन्महाप्रेष्ठप्रह्लादप्रीत्यपेक्षया।
किं ब्रूयां परमत्रास्ते गौरी लक्ष्म्याः प्रिया सखी॥ ६६॥

तद्गत्वा सुतले शीघ्रं वर्धयित्वाशिषां गणैः।
प्रह्लादं स्वयमाश्लिष्य मदाश्लेषावलिं वदेः॥ ६७॥

अहो न सहतेऽस्माकं प्रणामं सज्जनाग्रणीः।
स्तुतिञ्च मा प्रमादी स्यात्तत्र चेत् सुखमिच्छसि॥ ६८॥

इति भागवतामृते भगवत्कृपासारनिर्धारखण्डे प्रपञ्चातीतो नाम तृतीयोऽध्यायः ।

# Chapter 4

# भक्तो नाम

श्रीपरीक्षिदुवाच

श्रुत्वा महाश्चर्यमिवेशभाषितं
प्रह्लादसन्दर्शनजातकौतुकः।
हृद्यानतः श्रीसुतले गतोऽचिराद्
धावन् प्रविष्टः पुरमासुरं मनिः॥ १॥

तावद्विविक्ते भगवत्पदाम्बुज-
प्रेमोल्लसद्ध्यानविषक्तचेतसा।
श्रीवैष्णवाग्र्येण समीक्ष्य दूरतः
प्रोत्थाय विप्रः प्रणतोऽन्तिकं गतः॥ २॥

पीठे प्रयत्नादुपवेशितोऽयं
पूजां पुरावद्विधिनार्प्यमाणां।
सम्भ्रान्तचेताः परिहृत्य वर्षन्
हर्षास्रमाश्लेषपरोऽवदत्तम्॥ ३॥

श्रीनारद उवाच

दृष्टश्चिरात् कृष्णकृपाभरस्य
पात्रं भवान्मे सफलः श्रमोऽभूत्।
आबाल्यतो यस्य हि कृष्णभक्तिर्
जाता विशुद्धा न कुतोऽपि यासीत्॥ ४॥

यया स्वपित्रा विहिताः सहस्रम्
उपद्रवा दारुणविघ्नरूपाः।
जितास्त्वया यस्य तवानुभावात्
सर्वेऽभवन् भागवता हि दैत्याः॥ ५॥

कृष्णाविष्टो योऽस्मृतात्मेव मत्तो
नृत्यन् गायन् कम्पमानो रुदंश्च।
लोकान् सर्वानुद्धरन् संसृतिभ्यो
विष्णोर्भक्तिं हर्षयामास तन्वन्॥ ६॥

कृष्णेनाविर्भूय तीरे महाब्धेः।
स्वाङ्के कृत्वा लालितो मातृवद्यः।
ब्रह्मेशादीन् कुर्वतोऽपि स्तवौघं
पद्माञ्चानादृत्य सम्मानितो यः॥ ७॥

वित्रस्तेन ब्रह्मणा प्रार्थितो यः
श्रीमत्पादाम्भोजमूले निपत्य।
तिष्ठन्नुत्थाप्योत्तमाङ्गे कराब्जं
धृत्वाङ्गेषु श्रीनृसिंहेन लीढः॥ ८॥

यश्चित्रचित्राग्रहचातुरीचयैर्
उत्सृज्यमानं हरिणा परं पदं।
ब्रह्मादिसम्प्रार्थ्यमुपेक्ष्य केवलं

वव्रेऽस्य भक्तिं निजजन्मजन्मसु॥ ९॥

यः स्वप्रभुप्रीतिमपेक्ष्य पैतृकं
राज्यं स्वयं श्रीनरसिंहसंस्तुतौ।
सम्प्रार्थिताशेषजनोद्धृतीच्छया
स्वीकृत्य तद्ध्यानपरोऽत्र वर्तते॥ १०॥

यः पीतवासोऽङ्घ्रिसरोजदृष्ट्यै
गच्छन्वनं नामिषकं कदाचित्।
नारायणेनाहवतोषितेन
प्रोक्तस्त्वयाहं तु सदा जितोऽस्मि॥ ११॥

श्रीपरीक्षिदुवाच।

एवं वदन्नारदोऽसौ हरिभक्तिरसार्णवः।
तन्नर्मसेवको नृत्यन् जितमस्माभिरित्यरौत्॥ १२॥

श्रीनारद उवाच।

भो वैष्णवश्रेष्ठे जितस्त्वयेति किं।
वाच्यं मुकुन्दो बलिनापि निर्जितः।
पौत्रेण दैतेयगणेश्वरेण ते
संरक्षितो द्वारि तव प्रसादतः॥ १३॥

इतः प्रभृतिकर्तव्यो निवासो नियतोऽत्र हि।
मयाभिभूय दक्षादिशापं युष्मत्प्रभावतः॥ १४॥

परीक्षिदुवाच।

स्वश्लाघासहनाशक्तो लज्जावनमिताननः।
प्रह्लादो नारदं नत्वा गौरवदवदच्छनैः॥ १५॥

श्रीप्रह्लाद उवाच।

ॐ नमो भगवते वासुदेवाय।
भगवन् श्रीगुरो सर्वं स्वयमेव विचार्यतां।
बाल्ये न सम्भवेत्कृष्णभक्तेर्ज्ञानमपि स्फुटम्॥ १६॥

महतामुपदेशस्य बलाद्बोधोत्तमे सति।
हरेर्भक्तौ प्रवृत्तानां महिमापादकानि न॥ १७॥

विघ्नानभिभवो बालेषूपदेषः सदीहितं।
आर्तप्राणिदयामोक्षान(?)नङ्गीकरणादि च॥ १८॥

कृष्णस्यानुग्रहोऽप्येभ्यो नानुमीयेत सत्तमैः।
स चाविर्भवति श्रीमन्नधिकृत्यैव सेवकं॥ १९॥

हनूमदादिवत्तस्य कापि सेवा कृतास्ति न।
परं विघ्नाकुले चित्ते स्मरणं क्रियते मया॥ २०॥

यन्मद्विषयकं तस्य लालनादि प्रशस्यते।
मन्यते मायिकं तत्तु कश्चिल्लीलायितं परः॥ २१॥

स्वाभाविकं भवादृक् च मन्ये स्वप्नादिवत्त्वहं।
सत्यं भवतु वाथापि न तत्कारुण्यलक्षणम्॥ २२॥

विचित्रसेवादानं हि हनूमत्प्रभृतिष्विव।
प्रभोः प्रसादो भक्तेषु मतः सद्भिर्न चेतरत्॥ २३॥

श्रीमन्नृसिंहलीला च मदनुग्रहतो न सा।
स्वभक्तदेवतारक्षां पार्षदद्वयमोचनं।
ब्रह्मतत्त्वनयादीनां कर्तुं वाक्सत्यतामपि
निजभक्तिमहत्त्वञ्च सम्यग्दर्शितुं परम्॥ २४॥

परमाकिञ्चनश्रेष्ठ यदैव भगवान् ददौ।
राज्यं मह्यं तदा ज्ञातं तत्कृपाणुश्च नो मयि॥ २५॥

तं भ्रंशयामि सम्पद्भ्यो यस्य वाञ्छाम्यनुग्रहं।
इत्याद्याः साक्षिणस्तस्य व्याहारा महतामपि॥ २६॥